**दीपकलिका** स्त्री दीपस्य कलिकेव । १दीपशिखायां शूलपाणिकृते २याज्ञवल्क्यसंहिताटीकाभेदे च ।

**दीपकिट्ट** न० ६त० । कज्जले शब्दार्थकल्पतरुः ।

**दीपकूपी** स्त्री दीपस्य कूपीव । दीपवर्त्तिकायाम् दीपदशायाम् शब्दमा० ।

**दीपखोरी** स्त्री खोर–गत्याघाते णिच्–अच् गौरा० ङीष् । ६त०। दीपवर्त्तिकायां (शलते) शब्दमाला ।

**दीपध्वज** पु० दीपस्य ध्वज इव । कज्जले जटाध०।

**दीपन** त्रि० दीपयति वह्निम् दीप–णिच्–ल्यु । १तगरमूले रत्नमा० २कुङ्कुमे त्रिका० । ३मयूरशिखावृक्षे ४शालिञ्चशाके च पु० शब्दच० ५कासमर्दे ६पलाण्डौ च पु० राजनि० । ७दीपकमात्रे त्रि० । भावे ल्युट् । ८प्रकाशने न० ९मोहामन्त्रसंस्कारभेदे च "मन्त्राणां दश कथ्यन्ते संस्काराः सिद्धिदायिनः । जननं जीवनं पश्चात्ताडनं बोधनं तथा । अथाभिषेको विमलीकरणाप्यायने तथा । तर्पणं दीपनं गुप्तिर्दशैता मन्त्रसंस्क्रियाः । "तारमायारमायोगो मनोर्दीपनमुच्यते" शारदाति० । दीप्यतेऽनया दीपि–करणे ल्युट् ङीप् । दीपनी १०मेथिकायां ११पाठायां १२यवान्याञ्च स्त्री राजनि०। १३दीपनसाधने त्रि० स्त्रियां ङीप् । "त्रिफला कफपित्तघ्नी मेहकुष्ठविनाशिनी । चक्षुष्या दीपनी" "निहन्याद्दीपनं गुल्मपीनसाग्न्यल्पतामपि" । "कटुकोदीपनः पाचनो रोचनः शोधनः" इति च सुश्रु० ।

**दीपनीय** पु० दीपनाय जठरानलोद्दीपनाय हितः छ । १यवान्यां राजनि० औषधवर्गभेदे "पिप्पली पिप्पलीमूलं चव्यचित्रकनागरम् । दीपनीयः स्मृतो वर्गः कफानिलगदापहः" चक्रपाणिदत्तः । दीप-णिच-अनीयर् । २ ज्वालनीये त्रि० ।

**दीपपादप** पु० दीपस्य पादप इव आश्रयत्वात् । (पिलसुज) दीपाधारे शब्दार्थकल्प० दीपवृक्षादयोऽप्यत्र ।

**दीपपुष्प** पु० दीपः तत्कलिकेव पुष्पमस्य । चम्पके राजनि०।

**दीपभाजन** न० ६त० । दीपपात्रे तज्ज्वालनतैलाधारे पात्रे "वासनार्चिरिव दीपभाजनम्" रघुः ।

**दीपमाला** स्त्री दीपानां माला । श्रेणीभूते प्रदीपसंघे "उद्बुद्धां च जगद्धात्रीं पूजयेद्दीपमालया" ति०त०।

**दीपवत्** त्रि० दीप+अस्त्यर्थे मतुप् मस्य वः । १दीपयुक्ते गृहादौ स्त्रियां ङीप् ङीबन्तः २कामरूपपीठस्थे नदीभेदे "शाश्वती कथिता या तु नदी मत्स्यध्वजा स्थिता । तस्याः पूर्वे समाख्याता नदी दीपवती मता । एषा च हिमवज्जाता छिन्दन्ती दीपवत्तमः । तेन देवमनुष्येषु नदी दीपवती स्मृता । दीपवत्याः पूर्वतस्तु शृङ्गाटोनाम पर्वतः" कालिका०पु० ८२अ०

**दीपशत्रु** पु० ६त० । कीटभेदे (जोनाकीपोका) पारस्करनि०

**दीपशिखा** पु०६त०। १प्रदीपज्वालायाम् उपचारात् तज्जाते २कज्जले च शब्दार्थचन्द्रिका ।

**दीपशृङ्खला** स्त्री दीपानां शृङ्खलेव । दीपावल्यां हारा०

**दीपान्वित** त्रि० ६त० । १दीपयुक्ते गृहादौ श्मशानचत्वरादिषु देयदीपयुक्तायां मुख्याश्विनस्य गौणकार्त्तिकस्य २अमावास्यायाम् स्त्री तत्कर्त्तव्यादि यथा

भविष्यपुराणे "येयं दीपान्विता राजन् । ख्याता पञ्चदशी भुवि । तस्यां दद्यान्न चेद्दत्तं पितृणां वै महालये । प्रदोषसमये लक्ष्मीं पूजयित्वा यथाक्रमम् । दीपवृक्षास्तथा कार्य्या भक्त्या देवगृहेष्वपि । चतुष्पथे श्मशानेषु नदीपर्वतसानुषु । वृक्षमूलेषु गोष्ठेषु चत्वरेषु गृहेषु च । वस्त्रैः पुष्पैः शोभितव्याः क्रयविक्रयभूमयः । दीपमालापरिक्षिप्ते प्रदोषे तदनन्तरम् । ब्राह्मणान् भोजयित्वादौ विभज्य च बुभुक्षितान् । अलङ्कृतेन भोक्तव्यं नववस्त्रोपशोभिना । स्निग्धैर्मुग्धैर्विदग्धैश्च बान्धवैर्भृतकैः सह" तिथित० ।

निर्णयसिन्धौ तत्र विशेष उक्तो यथा

कालादर्शे "प्रत्यूष अश्वयुग्दर्शे कृताभ्यङ्गादिमङ्गलः । भक्त्या प्रपूजयेद्देवीमलक्ष्मीविनिवृत्तये" अस्य व्याख्याने आदिशब्दात्पञ्चत्वगुदकस्नानादेरुपसंग्रहः तदुक्तं पद्मपुराणे "स्वातिस्थिते रवाविन्दुर्यदि स्वातिगतो भवेत् । पञ्चत्वगुदकस्नायी कृताभ्यङ्गविधिर्नरः । नीराजितो महालक्ष्मीमर्चयन् श्रियमश्नुते । अश्वयुग्दर्श इति दर्शशब्दः प्रत्यूषे स्वातियुक्ततिथिपरः तदुक्तं ब्राह्मे "ऊर्जे शुक्लद्वितीयायां तिथिषु स्वातिऋक्षगे । मानवो मङ्गलस्नायी नैव लक्ष्म्या वियुज्यते" । तत्रैव "इषे भूते च दर्शे च कार्त्तिकप्रथमे दिने । यदा स्वाती तदाभ्यङ्गस्नानं कुर्याद्दिनोदये"। कश्यपसंहितायां तु दीपावलिदर्शं प्रक्रम्य "इन्दुक्षयेऽपि संक्रान्तौ रवौ पाते दिनक्षये । तत्राभ्यङ्गो न दोषाय प्रातः पापापनुत्तये" इति । स्वातियोगं विनाप्यभ्यङ्ग उक्तः । मात्स्ये "दीपैर्नीराजनादत्र सैषा दीपावली स्मृता" । अत्र विशेषो हेमाद्रौ भविष्ये "दिवा तत्र न भोक्तव्यमृते बालातुराज्जनात् । प्रदोषसमये